पिकोपिशार्दूलाष्टापदसिंहमारकोवनेमहज्जंतुविशेषस्तस्यविशिष्टक्रीडितं।तन्मृगयाल
क्षणंविशेषेणस्वयमेवतत्राचारति।यथायमःसर्वमारकःनिर्दयःतथाकंदर्पोपिशा
र्दूलविक्रीडितंविरचयन्यमावतङ्गत्यर्थः॥सर्वोस्मिविलखतिरहसिजरंगमदेननवंतमस
मरानस्तमित्थंकृत्वाकंदर्पस्तमेवव्यतस्त्वद्विरहेणएवंजायमानत्वात्।एतेनश्रीकृष्ण
स्यनिर्दयत्वंकाठिन्यंचोक्तं।यतस्त्रावासोविपिनवातेरित्यादिउत्पवेतानिश्रुत्वाइतिस्त्रि।
यधारामेवस्नेहव्यवसायानावात्रथोक्तिमितिभावः॥अतःपरंजनस्तद्विशेषचेष्टामाहस्त
नविनीहितमपीत्यादि॥स्तनविनिहितमपिहारमुदारं॥सामनुतेकृशतनुरतिभारं॥राधि
काविरहेतवकेशव॥१॥ ॥गीतस्यदेशाषरागः॥ ॥यथात्रास्फोटनाविष्कृतरोमहर्षोनि
युद्धसंनद्धविशालबाहुःपांशुःप्रचंडद्युतिरिंडगौरोदेशाषरागःकिलयुद्धमूर्तिः॥ताल
श्चैकताली॥पुनस्तस्यागमनाशक्तिरुच्यते॥हेकेशवेति।संबोधनेनराजसादिनावयुक्तानी

सुखदस्तेन निर्गुणया इत्याशयो ज्ञापितः॥ यथा आवासादिकं विपिनादिवन्मनुते सा रा
धिका आराधनसीसिरूपा तव विरहे स्तनविनिहितमपि हारं अतिभारं मनुते। तव वि
रहे दुःखदतया सर्वाणि भूषणानि। उत्तार्य निक्षिप्तानि। एकोपि स्तने स्थापितो हारस्तं वि
निहितं हारं भारं मनुते। कीदृशी सा कृशतनुः। कृशा तनुर्यस्याः सा। तथैव कृशास्ति हार
वहनसामर्थ्यमपि नास्ति। कीदृशं हारं। उदारं सामर्थ्यमपि दातारं। सुवर्णजालिकायुक्तक
तमणिकमध्यबद्धाधायकांबरकस्तूरिकादिदीप्तत्वादुदारं। हृदयं विहाय स्तनविनि
हितोस्याः पूर्वं सा तन्वी ततो विरहे कृशतनुः घनस्तनभारासहमाना तन्निराकरणाशक्यं
तस्मिन्विनिहितत्वाद्वैशीघ्र्यां भारं मनुत इति भावः॥ यद्वा। स्वहृदयमर्मणि सजलनलि
नीदलजालं चनवदवनाय वर्मकरणाङ्गवंतं। हृदयस्थं ज्ञात्वा तदुदारहारं भारत्केशौ
मान्हृदित्यागायेन हृदयं त्यक्त्वा स्तनविनिहितमित्युक्तिः॥ न केवलं तद्वहनासामर्थ्यमन्यदाह॥

सरसमसृणमपीति॥ ॥सरसमसृणमपिमलयजपंकं।पश्यतिविषमिववपुषिसशंकं।रा
धिका॥२॥ ॥खिव्यसखीलीलानि:दावदहनज्वालाकलापदृश्वातुलालादिभुष्प।
रसेनसहकर्लीपीनरसंत्र्यसृणंकोमलंचंदनेनत्वसमर्पितंचंदनसमरणान्विश्वासोमो॥
चित्तमेवाह।श्वसितपवनमिति॥ ॥श्वसितपवनमनुपमपरिणाहं।मदनदहनसि
ववहतिसदाहं॥राधिका॥३॥सासदाहंश्वसितपवनंवहति।श्वसितेनदावदहनज्वा
लाकलापतुल्यज्वालासदाहं।श्वसितपवनंनिश्वासवायुंमुखात्वहतिकोर्थः॥वादयति
कीदृशं।श्वसितपवनं।अनुपमपरिणाहं।नविद्यतेउपमायस्यतं।अनुपमंउपमारहितं।दैर्घ्यं
यस्यदैर्घ्यस्यउपमानास्ति।एवंसदाहंनिश्वासीमुंचतीत्यर्थः॥पुनःकीदृशं।उत्प्रेक्ष्यतेमदनद
हनमिषाकामाग्निमिवमदनदहनदृष्टांतोक्त्याअन्योग्निर्जलादिसेकाच्छांतोभवेन्नायं।
तथाप्रस्तुतस्तस्मादधिकोनवेदनस्तत्रदृष्टांतमितिभावः॥यद्वा।[illegible]ग्निसंतापस्तुकद।

तिनानुभूतः। मदनदहनानुभूयमानत्वादितोधिकोन्योग्निर्न भविष्यति दहतीति दहनः त
स्मादतिवाहत्येवातः। तद्रूपमोक्षेति च ज्ञापितं। अन्यदप्याह। दिशि दिशि किरतीति॥ ॥दि
शि दिशि किरति सजलकणजालं। नयननलिनमिव विगलितनालं। राधिके॥ध॥ सा नयनन
लिनं दिशि दिशि किरति विक्षिपति। त्वदागमनाशया दिशि दिशि नेत्रकमलं किरति। दिशी
ति जनसंख्यां न जाने कस्या दिशः सकाशादागच्छेदिति ज्ञात्वा सर्वासु दिक्षु इत्यभिप्रायेण
वी सा कीदृशं सजलकणजालयुक्तैः। यथाश्रुक्लानि नन्वैर्युक्तथाविधैः कमलैः यथा।
मार्गस्तरणं क्रियते तथा लक्ष्य नलिनं दि किरति। नलिनमित्येकवचनोक्त्या एकाग्रदृष्ट्या
मार्गावलोकनार्थमेवनमिति भावः। सजलकणजालं नलिनस्योत्प्रेक्षां करोति। क
मिव। विगलितनालमिव। यथा विगलितविछिन्ननालं। नलिनं श्रवति तथा तन्नयन
नलिनं सजलकणजालमिति॥ ॥एवं मार्गावलोकनं कथं करोति। किञ्चालयतल्पे ३॥

यनंकृत्वाकथंतिष्ठति।स्वयमेवाह।मागमिष्यामितत्राह॥नयनविषयमिति॥ ॥नयन
विषयमपिकिशलयतल्पंकलयतिविहितहुताशनकल्पं।राधिका॥ध्रु॥हेकेशव~~कि~~
विविधमाल्याश्रिताशावासा।सानयनविषयमपिकिशलयतल्पंविहितहुताशनविकल्पं।
कलयति।तसास्तत्रशयनंकृतः।त्वांविनानयनविषयंअपिकिशलयतल्पंचदृगोच
रंअपिकिशलयशय्यांकृतमग्निनिर्हृतांगारविकल्पंविशेषेण।कल्पंतुल्यंकलयतितद्वत्स
त्रपतिइत्यर्थः।एतत्वन्निर्गमंयथास्यात्तथापरपति॥हुताशमनल्पमितिपाठे।त्रनल्पोब
हित्यर्थः।हुतमह्यालीतिहुतेयस्तद्दस्तासेवतसंबंधात्ज्वालयसेवातस्तुल्यंकलय
तीतिभावः।तसाकिंकरोतितत्राह।सजतिनपाणितलेनकपोलमिति॥ ॥सजतिनपाणित
लेनकपोलं।बालशशिनमिवसायमलोलं॥राधिका॥ध्रु॥ ॥सापाणितलेनकपोलंन
सजति॥एवंविधायांदशायांजीवनमप्यशक्यंअतःकिंकर्तव्यमिति॥विचारमूढासती

उपविष्टापाणितलेन सहकृतं कपोलं न त्यजति। मशकादिकृतदंशकंडूयनार्थमपि न त्यजति। यथा कश्चित्सर्वस्वहानौ किमपि कर्तुमशक्तः सन् भोजनादिकं त्यक्त्वा पाणितले कपोलं कृत्वोपविष्टः पाणितलात्कपोलं न त्यजेत्तथा सापि न त्यजतीत्यर्थः। किमिव। उत्प्रेक्षते। सायंतनसंध्यासमये ऽलोलमचलं बालशशिनमिव। विरहपांडुमुखंदौपाणितलस्थापनेनार्द्धमुखस्य दर्शनाद्बालचंद्रोपमा। पाणितलस्य तांम्रत्वादरुणकसामिपाशंध्योपमा इत्यर्थः। एवंविधा सती यत्करोति तदाह। हरिरितीति॥ ॥हरिरिति हरिरिति जपति सकामं। विरहविहितमरणेव निकामं। रायिकाण॥७॥ सा सर्वमशक्यंज्ञात्वाऽशक्ये हरिरेवास्तीति मत्वा सकामं श्रेयसे वारंवारं हरिः सकलदुःखहारकत्वात् जपति। केवल विरहविहितमरणेव। विरहे प्रियाप्राप्तौ दशमीअवस्थावरूपत्वेन। विरहे विहितं प्राप्तमारब्धं मरणं यस्याः सैव निकामं। विरहावस्थापकमरणनिश्चयादंतेयामतिः सा

गतिरितिनिःकामजयेमुक्तिःस्यान्मुक्तिस्तुवीरुत्पालकाद्यंतसुखमित्साध्यत्वपाचतृष्णी।
तिरस्कृत्यादीयमानंतद्भक्तिंविनामसेवंतेजनाःस्वर्गापवर्गनरकेपितुल्यार्थदर्शि
नइत्याद्युक्तेश्चात्रतोदंदहरिःस्यांयथाहरौविरहदुःखंचविरहश्चनबाधतेतथांतेतत्स्मरण
दुःखितांमामपितन्नबाधतुइतिकामनयासहायवामद्भीवितत्स्मरणायांहरिर्नमिलतिविर
हेमरणंविहितमेवातोहरिस्मरणादंतेयामतिःसागतिस्तयाममहरिर्मिलतिअतोमरणमे
वास्तुइतिसकामं।हरिरिति॥वारंवारंपरासाविदतरायदशायांमरणस्यात्तदातदप्राप्ति
र्नैवेदत्तोवीप्सयाजपतीत्युक्तेजयविधानरीत्यारहःन्नूहायनजागरणसर्वत्यागपूर्व
कपूर्वैकिभावलयेनपुरःपरिकल्प्यनंध्यानंवहतिचवलितविलोचनजलभरेतित
र्पणंमदनदहनमिववसदाहश्वसितपवनवहनेहोमःतत्रजातिनपाणितलेनकपोल
मितिमुखपाणिसंबंधात्वर्तमानमधुरिपुरहमितिभावनयाऽनुभूतासतीविरह

दुःखनिर्वृत्तिपूर्वकं सुखप्राप्त्या। आस्वादनभोजनमित्युक्तंरीत्या जयतीति भावः। अस्मिन्समये केशवपदोपस्थापितं विना सुखप्रापको नान्योपायोस्तीत्यत्राह॥ ॥श्रीजयदेवभणितमिति॥ ॥श्रीजयदेवभणितमितिगीतं॥ सुखयतु केशवपदमुपनीतं। राधिका॥०॥ ॥इति सख्या यद्गीतं तत् श्रीजयदेवेन स्वप्रबंधेन भणितं केशवपदं शरणं स्थानं वा उपसमीपे नीतं प्रापितं यथाधिकारिणं प्रति सुखयतु आस्वादयतु। केशवप्रति सखीवचनं। स्वोक्तिमनगरडुपस्थाह हे जयदेव हे केशव स्वोक्तिनिर्भरेण संबोधनद्वयं तस्याः। एवंविधदशायां अर्थात्त्वैपि नीतं पदं सुखयतु। नान्योपायोस्तीति सखाभणितमित्याशयः। विरहदशायां मरणपर्यंतस्वीकारहेतोपक्रमेनाह सा रोमांचतीत्यादिभिः॥ ॥सा रोमांचति सीत्करोति विलपत्युत्कंपते ताम्यति ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्छत्यपि। एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्स्वर्वैद्यप्रतिम प्रसीदसि यदि त्वं नोन्यथा नांतकः॥ ॥हे स्वर्वैद्य

Geeta Govinda
Bhava Prabodhini

प्रतिमा। अश्विनीकुमारस्तत्प्रतिमा यस्य यद्वा। स वैद्य एव प्रतिमा यस्य विकृतिरूपत्वात्॥
हे तथाविधानन्तु विरहे मरणं विहितं कथं ज्ञातं तत्राह। सा रोमांचति। दशम्यवस्थापद्
वा नाह। मरणपर्यवसायां चेतत्त्रपद्यवान्नवेति। रोमांचादयः यावद्विरहे विहितमरणं नि
श्चितं स्वशरीरे तिष्ठ हरिरिति। वदति। सा रोमांचति। कामज्वरत्वात् कामजे चित्तविभ्रंशे रोम
हर्षश्च जायत इत्युक्तेः॥ यो हृष्टरोमांचस्त्वक्केशादिसंघातश्चलवान्। चक्रे एवं चेवो
च्छ्वसिति ते ज्वरो हंतिमानवमिति श्रावधेदोसत्वात्। सीत्करोति। सीत्कार एवं कं श्वस
न्ति सर्वेत्कश्वसितपवनमनुपसर्गतयाद्दमित्त[illegible] विलपति विशेषेण लपति। परिभाषणं
करोति। उत्कंपते। उद्अधिकं कंपते। ताम्यति। विसंज्ञस्ताम्यते यत्कज्वरेण म्रियते स इत्यु
क्तेश्च। ध्यायति। अनिमिषाद्रूपं चिंतयति। उद्भ्रमति उद्अधिकं भ्रमति। सन्ध्याद्दष्टमिवाप
मीलति। प्रकर्षेण मिलति अर्धदृष्टि प्रमीलति। अत एव पतति। आकोनिमीलनोद्वेजनादि

नोच्छुध्यो ल्छिता क्षिपतति। रूपाणि खिन्नास्यमिति। स्वयमुच्छिन्ना सतिय न अत्र स्खलत्सन्ध्यो गच्छ अबोधल।
ति ततो मूर्छ्छैत्यपि। गं भ्रमनाकलत्वात् मूर्छो प्राप्नोति एवंविधा रोमांचादि मूर्छापर्यंतं मरणा
सूचका एकादशोपद्रवा एकादशेंद्रियबाधका भवंति। एतावतानुज्वरेणावस्थाकारणमु
क्तं तुष्टतकामज्वरे अस्य ज्वरस्य द्वारा रं नव[illegible]रस्य विशेषस्य पाठकत्वात् उपाय
साध्यः। अयमतनुज्वरस्य उपचाराः साध्याः। [illegible]दोषिको न वेत्ता। श्वासो मूर्छ्छेरिति छ
दीर्घश्वासाकारविभ्रमक्रमाः। हिक्का वैवर्ण्य[illegible]ज्वरस्योपद्रवा दशेति तनुज्वरस्य। अतनु।
ज्वरैकादशोपद्रवमुक्तं[illegible]स्यार्थः। अयमतनुज्वरः। सा वरतनुः वराङ्गी इति
सुकुमारा[illegible]तनुर्यस्याः सा। अत्र त्वं हे स्ववैद्यप्रतिम। स्ववैद्यावश्विनीसुतौ अ
तिमाश्च यस्य सत्वं ततोप्यधिक एवंविधस्त्वं यदि प्रसीदसि तदा तेन वरसा[illegible]योगास
किं न जीवेत्। किं तु जीवेदपि। त्वं प्रसीदसि न चेत्तदा किं जीवेदपीति सूचितं॥ यद्वा॥ सा

वरतनुः वरार्थेतनुर्यस्यास्त्वमपिनटवरवपुरित्युक्तत्वात्क्षमामांमानास्तीतितस्याःस्त्राण
मावश्यकमितिभावः॥नन्वन्येवैद्याबहवःसंतितैरुपायाःकथंनकुर्वंतीतिचेत्तत्राह।एकोन्य
याहस्तकमिति।अन्यथात्वदतिरिक्तैरन्यवैद्यैःहस्तएवहस्तकःस्वार्थेकःततस्तेन्यस्वार्थ
एवोक्तः।बहुतरदानमुक्तमपितैर्हस्तस्पर्शः।हस्तत्यागःकृतःबाधा।अत्रअन्यथासखीभिःहस्तक्रि
याशीतलाद्युपचारस्पर्शः।कृतेष्वप्युपचारेषुबुद्धिर्नजातेति।तस्मादयंज्वरःसाधारणवैद्यैर्ज्ञातुमु
पचरितुमशक्यत्वमेवप्रसीदसिनचेत्तदासानजीवेदित्यर्थः।नन्वेतज्ज्वरेमरणंनस्यादिति
चेत्तथाहि।अभिलाषास्मृतिश्चिंतागुणसंकीर्तनंतथा।उद्वेगश्चप्रलापश्चउन्मादोव्याधि
रेवच।मूर्छाचैवाथमरणमवस्थाविरहेदशेति।अतस्त्वंप्रसीदेत्यर्थः।नन्वस्तुवैद्यप्रतिमोहं
तर्हिसवैद्यएवान्यायाःसउपायाःकरिष्यतीतिचेत्तत्राह॥स्मरातुरामिति॥स्मरातुरांदैवत
वैद्यहृद्यत्वदंगसंगामृतमात्रसाध्यां।विमुक्तबाधांकुरुषेनराधामुपेंद्रवज्रादपिदारुणोसि॥

Geeta Govinda
Vallabhacharya Bhava Prabodhini

॥२॥हेदेवतवैद्यहृद्यदेवतवैद्यतःहृद्यदेवतवैद्यहृद्यदेववैद्य।देववैद्याश्विनीकुमारःउपा
यज्ञोभवेत्परंतुहृद्योहृदयाभिप्रायज्ञोऽथवाहृदययोग्योनभवति।त्वंतुतस्मात्हृदययो
ग्योवैद्यश्चहृदयाभिप्रायज्ञश्चेत्यायद्वा।हेदेवतवैद्यहृद्यएवंविधांरोगांविशिष्टकृबाधांनकुरु
षेतदात्वर्वेंद इंद्रावरजोविष्णुस्तद्वज्रंतुदर्शनंतस्माद्दारुणोसिइतिमन्त्रोयद्वा।इंद्रवज्रा
दुपाधिकमुपेंद्रवज्रंतस्मात्त्वंदारुणोसि।उपाधिकाधीकृतमूर्त्तां।त्वदंगसंगामृतमात्रसा
ध्यां।त्वदंगसंगामृतमात्रेणसाध्यां।नतत्रोपायांतरंकर्त्तव्यमस्ति।यद्वा।सर्वांगसंगोसंबं
धीमास्तुत्वदंगमेकांगसंगमेवयदमृतमरणनिवर्त्तकमात्रयासाध्यां।यद्वा।हृद्यमभी
ष्टंयत्त्वदंगसंगामृतमात्रेणसाध्यां।अन्योपाद्याःहृद्याःनभवंति।हृद्योपायंविनाव्यथा
निवृत्तिर्नस्यात्।हृद्यंयत्त्वदंगसंगएवामृतस्यमात्रेकिंचित्तेनसाध्यांतदतिरिक्तामृ
तहरेणसाध्यामित्यर्थः॥हृद्यत्वमेवाह॥पुनःकथंभूतां।स्मरोरुरां।श्रमेणकामेनातु

रं। तं प्रति त्वदंगसंगामृतमेव साधयतीत थ्यायह्या। समर्थ्यतेतत्स्मरः तवस्मरणेनातुर।
त्वात्वदंगसंगामृतमात्रेण साध्यामिति च। नन्वेवं करणे मम वैद्यत्वात्को लाभ इति चेत्तत्राह।
राधामिति। संसिद्धिरूपामाराध्यां इति विमुक्तबाधाकरणमेव परमो लाभः। यदर्थं क्लमा·
एधं वैद्यत्वसमं त्वया रक्तियतेरा साधिताः सिद्धया॥ त्वाभिलषितेति तेन त्वदंगसंगामृतमा
त्रेण बाधानिवर्त्तनात्तत्कालिकं तु नित्यं रूपविरूपं नामृतवीर्यात्प्रवृत्तिरेव परमो लाभ इति·
भाव॥ ननु ज्वरबाधाविमुक्तं करणं यदि माद्ये स्वास्थ्यं कथं न जातं मदंगसंगामृतमात्रेण
साध्यामिति चेत्तत्राह॥ तदैतावत्कालपर्यंतं कथं प्राणितीति चेत्तत्राह॥ कंदर्पज्वरेति॥
कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमाःकमलिनीचिंतासु सं
ताम्यति। किंतु क्लांतिवशेन शीतलतनुं त्वामेवमेकं प्रियं ध्यायंती रहसि स्थिता कथम
होः क्षीणा क्षणं प्राणिति॥ ३॥ हे तपेंद्र वक्त्रादपि दासत्वेन कंसुखं दर्पयतीति। कंदर्प

स्मरज्वरेण सम्यक् संतापः। किंतु संतापः। स ज्वरः समाविततमरः तेन बाह्याभ्यंतरावरा
तिश्लेष्टा तनुर्यस्याः। श्रीराधायाः इदमाश्चर्यं यस्याश्चेतः चंदनचंद्रमःकमलिनीचिंतासु
चिंतनेऽपि चिरं संतापमेति ग्लानिं प्राप्नोति। तदर्दितस्याः स्पर्शादिकं दूरे एवास्तुं निंदति। चंदन
मिंदुकिरणमनुविंदति खेदमधीरमित्युक्तत्वात्। तदर्दिकेनप्रकारेण जीवतीत्यत्राह। दां
तिरसेनेति। त्वदागमनप्रतिरूपायाद्दांतिः कामा कीदृशी॥ तथाहि॥ अस्तं याति रवि
स्तथाप्यविरलं पंथावदृत्याऽवनं तं दिक्चक्रं तमसावृतं तथापि निकटे हहुं जनः शंकते॥ रा
त्रेरर्धगमास्तथापि शशिविलं[illegible]त्यसौ प्राची पांडुरलक्षणापि नयनं वामं मम स्प
दतीत्येवंविधा[illegible]मंदोलितिस्तनयो रसस्तेन किंतु शीतलतरं चंदनादिभ्योऽतिशीतलं
शीतलतरं तत्वामेव ममैकं प्रियं बाह्याभ्यंतरे स्वास्थ्यजननात् हृदिहं अन्यानि चंदना
दीनि शीतलानि चत्फलतस्तापजनकानि तेभ्यः प्रातिशीतलं शीतलतरं एवंविधं य

Geeta Govinda
Bhava Prabodhini

त्वमेवमेकं प्रियं रहसि एकांते लिखिता सती बाह्यांतरानुसंधानरहिता सती ध्यायती यथा
वयस्य त्वां चिंतयति तिलचासगेनच क्षीणा सती प्राणानिति प्राणी धारयति ध्यानावधानक्षणप्राप्त
प्राणसंमेलुकत्वात्। नजाने ये किं जातं भविष्यतीति क्षणस्याभिप्रायः॥ एवंविधागमनावसर
निक्रमणे न जीवितेन रहिता भविष्यतीपीति सूचितं॥ एवं भ्रकुलातिष्टसि चेडुपेंद्र वज्रादतिदा
रुणश्चेति भावः॥ ननु सर्वमपि रासेंतर्हिते त्वध्यवनान मानावस्थायां वाग्रणियात पुरः संरंस
मानितापि मानं नात्यजत् तदा सखीप्रेषणाय मानांगकरणार्थं ॐ जांतरंगत्वमयि यथा।
विरहे तु दूरस्ते का कथा पुरापि विरहसहनं नाभवदित्यत्राह॥ क्षणमपीति॥ ॥क्षणमपि विरहः पु
रा न सेहे नयननिमीलनखिन्नया यया ते। श्वसिति कथमसौ रसालशाखां चिरविरहेण।
विलोक्य पुष्पिताग्रां॥ ४॥ ॥हि पूर्वसीबोधनयुक्तंवत। पुरा पूर्वं यदा नयननिमीलनखिन्न
यया नयनयोर्नयनकमलयोर्निमेषेण खेदयुक्तया त्रुटिर्युगायते त्वाम पश्यन्ती॥ कुटिलॐ

तत्वं श्रीमुखस्वतेजउनदीक्ष्नतांपद्मरुहृह्शामिति॥ एकदाकृष्णविरहाद्ध्यायतीप्रियसंगममि
ति। एवंविधाय। खेदयुक्तयात्रया राधया कृष्णमपितेविरहं पुरानसेहे सहनंनक्रियते असौ
राधातिचिरविरहेणाश्रयिता [illegible] रसालशा [illegible] विलोक्य कथंश्वसति रसंश्रृंगारादिलाति अदत्त
इतिरसालातस्यशाखा [illegible] नतोऽश्रमागांदृष्ट्वाकथंश्वसतीत्वाख्यं निमिषविरहासहनशी
लायाश्चिरसहनविरहामत्याश्चर्यंयद्वारसालशाखाप्रविकाराकृष्णप्रतीक्ष्यागमावधि
स्तदंतिकंमेजीवनासंभवाद्यतः पुष्पितांरसालशाखांविलोक्य आगमनाभावे कथम
सौश्वसति। एतावत्कालपर्यंतंरसालशाखापुष्पितायानासीदधुनासमयेजातेपुष्पिता
जाताममापि प्रस्तावसरे प्रियस्यागमनं भविष्यत्येवेति निश्चित्य श्वसितीति श्लोकार्थः॥ त्र
थैवसुसमयेन राधासखीवाक्यं श्रुत्वा भगवंतमपि तस्याविरहेणातिदुःखितंदृष्ट्वा तत्रागम
नशंकंचकारतदा स्वस्वामिन्याः केशांश्चस्पृष्ट्वा प्रियमागमिष्यतीत्याराधा प्रतीक्षती सत्सखी

विलंबे जाते कथं स्थास्यतीति चिंतया तत्र गंतुकामा प्रियस्यागमनसत्यवचनात्हस्तप्रार्थनां कृत्वा तद्दानाय सर्वेषां श्रेयांसि विस्तारयतीत्याशयेनाह॥ दृष्टिव्याकुलेति॥ ॥दृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्द्धनं बिभ्रद्बल्लववल्लभाभिरधिकानंदाच्चिरं चुंबितः। कंदर्पच तदर्पिताधरतटीसिंदूरमुद्रांकितो बाहुर्गोपतनोस्तनोतु भवतः श्रेयांसि कंसद्विषः॥५॥ गोपतनोः गोपजातिस्थार्थंतनुर्यस्य सवर्त्तनदान्व्रजजनार्त्तिहरो निजातङ्कमुक्तत्वादेवंविधस्य कंसद्विषश्च व्रजद्वेष्टा कंसस्तस्यारिस्तेनाशयविलासाद्धृतासौ स्मदर्पपीडाउद्धृतस्तस्य बाहुर्दत्तस [illegible] पवैरूपः। भवतां बहु० वचनेन द्वयोर्विरहदुःखं दृष्ट्वा तत्संबंधेन दुःखितानां सर्वजनानामपि श्रेयांसि। अत्र सवाचिककायिकम्नृतस्य विप्रकर्षमानानि कल्याणानि तनोतु विस्तारयतु आसंल्लिप्ताशीः। किंच। पूर्वमनुक्तं तद्बहुकालस्थाणश्रेयसारणपबाहुरूपकः। तदेवाह॥ ॥एवंकुपितं गोकुलनाशाय कृतदृष्ट्या व्याकुलगो

ऊलस्यावनरसाद्रक्षणरसात्॥ प्रार्थनया रक्षणरसस्यानुभवकरणात् गोवर्द्धनं गवां।
गोपानां वर्द्धनं यस्मात्तमुत्क्षिप्य ऊर्द्धं धृत्वा बिभ्रत् धृत्वा स्थितो बालः स कथंभूतः। वल्लववल्लभा
भिरधिकानंदाभिश्चुंबितः। ननु रक्षा तु सर्वेषां कृता तैर्न चुंबितः वल्लववधूनाभिश्चुंबने हे
तुरत्रोच्यते। वल्लवानां महाबलिष्ठानां ये महामत्तान् वृषभान् शृंगे गृहीत्वा नाशारज्जु
प्रोक्ताः कुर्वंति तेषां वल्लभाः तैरेवंविधैर्बलिष्ठैरपि तैस्तासां मनोरथपूर्त्तिर्न कृता। अतोस्मा
न्निरयं स एवाधिकः पतित्वेन प्रार्थितत्वादेतस्मादस्मनोरथपूर्त्तिः कथं भविष्यतीति तासा।
मानंदाभावः। स्थितस्ततो महाद्रिशैलराट् गोवर्द्धनं धृत्वा सप्तदिनस्थितत्वाद्बालः कृत्पेच
दग्धमसाधारणीदृशीताभिर्ज्ञातमयं महा[illegible]बलिष्ठः। अस्मिन्मनोरथपूर्त्तिः करि
ष्यत्येव एवंविधाधिकानंदाभ्याभिश्चिरं चुंबितः। अत एव हर्षविमुक्तो विपुलपुलकभुजप
ल्लवयुवतिसहस्रमिति भावः॥ नो चेदयमतिसुकुमारः स एवाधिकस्तस्य महाद्रिधा

रणाछाकुपीननंदृष्ट्वास्नेहातिशयेक्केशोन्नवेन्मलानंदः॥अतोधीरोद्धतनायकोयंसाम
र्थ्यवाह्ननंकारीमायावीरोषणोबलः॥विषकठनश्चविदद्भिर्धीरोद्धतउदाहृतइतिश्रीला
नंदाच्छिरलुंबिविविदत्स्पर्शी॥पुनःकीदृशोबालकः॥दर्पणेवेति॥एवंविधोस्मत्पतिरितिदर्पेणैव
गर्वितैवतदर्पिताधरतटी॥तस्मिन्बाहौअर्पिताधरणंतट्याःसकाशात्सिंदूरमुद्रयांके
कितः॥अधरस्थितसिंदूरवत्तांबूलरागेणमुद्रितइत्यर्थः॥मुद्रांकितोस्त्यात्दर्पेणैवेत्येवका
रेणचान्येषांनिषेधश्चुंबनेसूचितः॥यद्वा॥अयंबालकरस्मद्दाथीमिवेतिमुद्रयांकितः॥त
स्मान्मच्छरणंगोष्ठंमन्नाथंमत्परिग्रहं॥गोपायेस्वात्मयोगेनसोयंमेव्रतआहितइतिप्रतिज्ञा
करणात्॥गोकुलजनरक्षणव्रतकरणस्य॥श्रीगोकुलेशकुमारस्यायंबालकइतिमुद्रित
मित्यर्थः॥यद्वा॥दर्पणैवइंदुरसादर्पदूरीकरणहेतुनाअधरतटीपदोक्त्या॥यथामहानदीसमु
द्रगामिनीतटपर्यंताजलपूरितातटीपदवाच्या॥तथाएतादृशीमहानदीतुल्यानामुत्सलित

Geeta Govinda
Bhava Prabodhini

रसपूरितानांवक्त्रपल्लवानामधरतटीष्वेवोत्कटदर्पेणाधिकानंदामृतपूरिताधरत
टीवासर्वरसानंदामृतार्णवनायकशिरोमणिसच्चिदानंदरूपगोपतनोःश्रीकृष्ण
स्यबाहूतरंगमिलितानांवक्त्रपल्लवानांमधरामृतपूरिताधरतटीज्ञेया।एवं
विधाभिःबाहुःसिंदूरमुद्रांकितःसिंदूरमुद्रांकितोऽस्त्यतोऽसौसर्वेषांराज्ञामधिका
रिणामपीमुद्राकरणंभवतिराज्ञस्तुसिंदूरमुद्राकरणंतथायंराजाधिराज्ञःश्रीकृष्ण
स्यबाहुःएवंविधसिंदूरमुद्रांकितइत्यर्थः।एवंविधस्पर्शेनमत्सखीविरहतापदुःखं
दूरीकरिष्यतीतिभावः।नन्वेवंविधश्चेत्तदामयमुत्पाद्यस्तांकथंकुर्यादेतेषांदुःखो
त्पत्तिरिवनकार्यमितितत्राहआश्रवनरसादिति।। ।।सर्वरसभोक्ताभगवान्भयंवि
नारसालकस्यकार्यातःभयंदुःखंचोत्पादयनइत्थारसानुभवोनस्यात्तथैवैतस्याव
नरस्यानुभवार्थंतथाकरणमित्याशयश्चज्ञापितः।। ।।इतिश्रीगीतगोविंदेना

Pandit Shri Gattulalaji Research Centre
Geeta Govinda
Bhav Prabodhani

व प्रबोधिन्यां मंद मधुसूदनो नामश्चतुर्थः सर्गः॥ ॥एवं श्रीराधिकादुःखश्रवणा
न्मधुसूदनः मंदचेष्टा इवो जातः॥ सर्गश्चात्र तथाविधः सर्गेपि पंचमे गीतद्वयेनैव तु राधि
कां। प्रत्यागतसखीवाक्यमुवाचात्र निषते। तयोरेकेन गीतेन स्ववल्लभवर्णनं हरेः। अ
भिसारप्रकारश्च द्वितीयेन तथोच्यते। ततः स भगवान्निकुंजं श्रुत्वा चैव सखीवचः॥ उवा
च गमने शक्तः श्रुत्वा सापि तथाकरोत्॥ ॥तदेवाह॥ ॥अहमिह निवसामीत्यादि॥
अहमिह निवसामी याहि राधामनुनयमद्वचनेन नयेथा। इति मधुरिपुणा सखी नियु
क्ता स्वयमिदमेत्य पुनर्जगाद राधां॥१॥ ॥हे राधासखि॥ ॥अस्मिन् स्थले निवसामि। त्व
द्विरहादुःखेनान्यत्र गंतुमशक्तः त्वं याहि। यामद्विरहेण एवं विधा अस्मे तां राधां मद्वचना
नुनयेन कृत्वा तामानयेथाः। इदमनुना प्रकारेण मधुरिपुणा नियुक्ता प्रेषिता सती स
खी स्वयमेत्य तत्र गत्वा इदं वक्ष्यमाण राधां प्रति पुनर्जगाद एकवारं प्रथमतः। अनंद

कंदर्पज्वरजनितचिंताकुलतयाचलद्बाधांराधांइत्युक्तं॥विहरतिहरिरिहसरसवसं
तेहरिरिहमुग्धवधूनिकरेविलासिनीविलसतिइत्युक्तं॥पुनःइदंजगादेत्यर्थः॥ननुए
वंमुक्तंराधामाधायहृदयेतत्याजव्रजसुंदरी॥अथचइतस्ततस्तामनुसृत्यराधिकामि
त्यादिनाचमत्तोमामियमितिगीतेनस्वकृतखेदोप्युक्तः॥क्षम्यतामपरंकदापीत्येवंवि
धार्तिरप्युक्तासख्युक्तमपितस्यादुःखंश्रुत्वातत्रगत्वास्वकीयंतदीयंचविरहदुःखं
कथंनदूरीकृतं।यदहमिहनिवसामीतिस्नेहहीनमुक्तवान्॥इतितत्रोच्यतेरसोवै·
सइत्यादिश्रुत्युक्तत्वाद्रसात्मकोरसभोगार्थमाविर्भूतश्चरसस्तुनानात्मकः॥संयोग
विप्रयोगात्मकश्च॥संयोगेनानाविधप्रकारैरसंभोगकृतः॥तथाविप्रयोगेपिनानावि
धप्रकारकउत्कंठाभिसारिकावासकसज्जाविप्रलब्धाखंडिताकलहांतरितास्वाधीनभर्तृ·
काउक्तादिरसानामनुभवःपरस्परंकर्त्तव्यइतिज्ञात्वानगतवानितिभावः॥तस्मादुक्तमह

मिहनिवसामीति।तत्रगतोभवेत्तदाग्निरणादिरसानामनुभवोनस्यात्।अतउक्तंमद्वचनेन
चानयेथाः।चकारात्तसानागमिष्यतितदाहमप्यागमिष्यामीतिज्ञापितं।किंच।यथानायका
याः।विरहावस्थानायकंप्रत्युक्तातथाप्रियस्यापिविरहावस्थानायिकांप्रतिकथनीया।रसा
नुभवदा।कार्यश्च।यद्वा।मधुरिपुत्वान्निर्दयत्वाच्चतथोक्तमितिभावश्च।ज्ञापितः।इतिहेतोर्मधु
रिपुणासखीनियुक्ता।यद्वा।तस्याआर्त्तिश्रवणाद्व्याकुलीभूतोपिपूर्वकृतापराधंचिंतयित्वा
तद्भीत्यानागतः।पूर्वमहंदुःखनिवेदनपूर्वकानुनयेनतत्कोपशिथिलीकरणार्थंसखींप्रे
षितवानिति।अन्यच्च।सख्यासहगमनेनमानोपिगाढोपिभविष्यतीत्यभिप्रायेणमधु
रिपुणासखीनियुक्तेतिभावः।मधुरिपुपदोक्त्यारात्रावेकाकीवनेस्थितस्तस्मान्निर्भयत्वंसू
चितं।किंनियुक्तेत्याकांक्षायांहेसखीत्वयाहियदित्वयैवमद्वचनानुनयेनापराधक्षमा
पनंकृत्वानेतुंशक्यतेचेत्तामानयेथाः।तावत्कालपर्यंतमहमिहनिवसामि।इत्युक्त्वा

सतीसखीस्वयंतत्रगत्वेदंवक्ष्यमाणंश्र्वस्वस्वामिन्याःविरहावस्थांमाधवंप्रत्युक्तातथापुन।
स्तस्यप्रियस्याविरहावस्थांराधाप्रतिजगादेत्यर्थः।तदेवाह॥ ॥वहतीति॥ ॥वहतिमलयस
मीरेमदनमुपनिधाय।स्फुटति।कुसुमनिकरेविरहिहृदयदलनाय॥१॥तवविरहेवनमालीस
खिसीदतिहेसखितमानेकुमदंगतासतीतवविरहापेक्षयाल्पविरहेवनमालीसीदतियथा
त्वंप्रियस्यविरहेसीदसीति।एवंविधस्तापउक्तः।सन्[illegible]त्यर्थंवनसंबधीशीतलजलपुष्पप
ल्लवादीनांमाल्यांविधायधारयन्तीत्येवंविधो[illegible]लीतथापितापप्रशांतिर्नजातातततःसी।
दतियथा।नन्वेवंचेदहमेतावत्कालपर्यंतंतस्यागमनाशयावलंबेनजीविता।स्थितासक
थंमद्विरहेतिष्ठतीतितिष्ठन्नीतिचेत्तत्राह।वनमालीति॥वनमाली।सर्वोत्कृष्टकलितललित
वनमालैकसत्वात्स्वकरकल्पितावनमालापरिधानावलंबनेनतिष्ठतीतिवनमाली।
पदोपन्यासःसीदतीतिवर्त्तमानप्रयोगेणाहमेतादृशांदशांसमागतानजानेयेकिं

Geeta Govinda
Bhava Prabodhini

जातंन्नविपत्ति।नन्वेवंविधंदृष्ट्वाप्रियंसख्याकथमागतासीतिचेत्तत्राह।मधुरिपुणो
वनियुक्तासतिआगता।किंनियुक्तास्म्यहमिहनिवसामियाहिराधामनुनयमद्वचनेन
चानयेथाः।इत्याज्ञाप्यासत्यमहमागतेत्यर्थः।मांप्रेषयित्वास्वयंत्वद्विरहदुःखसहनापेक्षया।
मरणमिववरमित्यंगीकृत्यसतदर्थोपायंमरणजनकंकरोतितत्राह।वहतीति॥कसति॥मै
वहति।मलयसमीरे।मलयसमीरेवहतिसति।किंकृत्वा।मदनमुपनिधाय।जितमानसिज
तंत्रविचारे।दक्षवैक्लिक्रूरात्रुत्वासाणोमा[illegible]हूतसायकममुंमाचापमारोपयक्रीडा।निर्जि
तविश्वमखिलंजनाघातेत।किंपौरुषमितिकथनात्वघातकंशत्रुंज्ञात्वामदज्ञापकं।समद
नंतपसमीपेनिधायस्थापयित्वामलयसंबंधीसमीरेमलयाचलस्थितचंदनतरोराश्लि
तभुजंगमकवलीकृतत्वाद्विषसंपर्कयुक्तत्वात्तंसमर्पकईरयतीतिसमीरस्तस्मिन्नस
मीरेवहति।सतिह्वैक्लिंव्यालनिलयमिलनेनगरलमिवकलयतिमलयसमीरमेव

विधुंसमीरे वहति सति सीदति। पुनः कसति। स्फुटतीति। विरहिहृदयदलनाय कुसुमनि
करे स्फुटति सति। विरहीणां मर्मपीडनाय कुसुमसमूहे विकसति सति। कुसुमतिकरे
रूपा दिनरात्रिविकाशशीलानां समूहे तेन दिवारात्रौ तथाविधी जवतीति झटितितं स्फुटत्पुष्पा
हृदयस्फोटनकरणलमुक्तं। कुसुमनिकराणां यथा कुसुमसमूहानां विकाशोभव
तितदा तत्रभृंगीवृंदमधुपानार्थमागतं दृष्ट्वा कुसुमतुल्यं स्वहृदयं तद्भृंगीवृन्दं विलो
क्य तस्य दलनं भवतीत्यर्थः। यथा कुसुमसहस्रं पायसोहंगनानां सद्यः पातिप्रणय
हृदयं विप्रयोगे स्फुणद्धि तु केन तत्तुल्यं तवहृदयं स्वागमनाशया विकसति सति स्वस्य गम
नाशाक्षमभावात्स्वचं गीप्रस्थं। अनयाचाद्दहतीतिदहति। शिशिरमयूखेमरणमुपकरोति
शिशिरमयूखे दहति सति। मरणं अनुकरोति। शिशिराः परमशीतला मयूखाः। मय
रूखास्तापमयाः उष्णरूपामयास्तापः रूपाएवोष्मा एवंविधाः किरणा यस्मिन्नस्तस्मि

न्दहतिसति।चंद्रोदयात्पूर्वमंधकारंज्ञात्वामत्प्रियागमिष्यति।किंवाहंगमिष्यामीत्ये
वंविचारयति।तस्मिन्समयेजातेचंद्रोदयेजातेगमनागमननिवृत्तौतदातन्मयूखादाहं
कारकाजाता।तदामरणमनुकरोति।मरणानुकरणेमरणानुवर्तिनीचेष्टाभवतिमूर्छा
दियावत्।पुनःप्रभुर्हसतितदामदनउपनिहितः।शोभावसरःकामःविशिखपातंकरो
ति।कुसुमविशिखे।कुसुमान्येवविशिखाबाणायस्मिंस्तस्मिन्कामेनिपततिसति।तदावि
लपति।विकलतरोति।।मूर्छितजनाघातेनकिंपौरुषंएवंप्रार्थितोपितथाकरोति।यद्वा
।कुसुमविशिखेपतति।धावतिसति।अनंगक्रुद्धाकिंमुधावसि।इतिपूर्वमुक्तत्वात्।वि
शिखाःविशिष्टाशिखाअग्राग्नितुल्याबाणायस्मिन्नेवंविधकुसुमविशिखे।यद्वातस्यवि
शिखाबाणाःकुसुमान्येवंतत्समूहविकाराद्दर्शनमेवतत्पतनं।तद्विरहिहृदयदलनक
त्वाद्बाणक्रमेणङःसहंज्ञात्वातदातिविकलतरःसन्विलपति।यद्वा।विकलतरःविग

Geeta Govinda
Balav Prabodhini

ताःकलाः।धैर्यादयो यस्या सो विकलः।अतिशयेन विकलः इति विकलतरः।स्वच विलपति
।अन्यच्च॥ ॥ध्वनतीति॥ ॥ध्वनति मधुपसमूहे श्रवणमपि दधाति।मनसिज वलित विरहे नि-
शिरुजमुपयाति।तव विरहेण॥२॥मधुपानां समूहे शब्दायमाने सति श्रवणं अपि दधाति किं
मत्प्रिया आयाति।तत्पद मंजीर ध्वनिशंकया श्रवणार्थत्वाच्छ्रवणमित्युक्तं।श्रवणमित्ये-
कवचनेन वक्रीकृतयीव्यया यत्र ध्वनिस्तत्र एकश्रवणधारणादेकवचनमिति भावः।तदाना-
गतां ज्ञात्वा मनसि वलित विरहे निशिरुजमुपयाति।मनसि वलितः व्याप्तः विरहो यस्मिन्
नेवंभूते मनसि।रात्रौ पीडां उपयाति।यद्वा।मधुपो रूपाकमलिनीमधुपीत्वा।ध्वनति सति त्वं
दधरपानस्वर्यीरहितत्वान्निशिरुजमुपयाति॥यद्वा।निशिरुजं उपसमीपे ऊर्जां तरेयाति
प्राप्नोति।तर्हि दूरे तिष्ठति।चेत्किं वाच्यमिति भावः॥निशीति पदोक्त्या दिवसे प्रतिक्षमाणास्ति
इति मत्प्रिया रजाववागमिष्यति।तदानागतां ज्ञात्वा निशिरुजमुपयानीत्युक्तमित्यर्थः।अ-

नस्थ।वसतीति॥ ॥वसतिविपिनवितानेत्यजतिललितधामा।लुठतिधरणिशयनेबहुविलपतितवनाममतवविरहे॥ध्रु॥पुनःकिंकरोतिवसतिविपिनविताने।विपिनमरण्यमेववितानमावरणादिकं यस्मिन्।तस्मिन्वसति।आस्तरणाच्छादनरहिते।ललितधामतवागमनाशया ललितातिमनोहरं।धामकुंजगृहं।नानाविधस्थलशयनोपवेशनादिविविधसंकल्पनोज्पादियुक्तंस्वच्छसुरभिशीतलजलजकुसुमनिर्मिततल्पवितानादियुक्तं।धामपदेनएवंविधंत्यजतित्वामनागतांज्ञात्वातस्मागंहत्वाविपिनवितानेवसति।तदाधरणिशयनेलुंठति।किंतुविलपतिबहुतवनाम।तत्रतवनाम।बहुवारंवारंविशेषेणवदति।तवनाममत्पत्कानामेत्यवदतीत्यर्थः॥अथातःएवंविधंस्वप्रियस्यातिदुःखश्रवणात्श्रीराधामूर्छिताजाता।एवंतद्विरहक्लेशेनातिदुःखितासीत्।एतावत्कालपर्यंतंतदागमनाशयायायन्मत्सखीप्रियमानेतुंगतास्तिनमानयिष्यति॥सनाथस्तदनंतरंप्रियस्यचवैकल्यंश्रुत्वात

याजाता।तदासख्याप्यग्निमखितिकथनाशंकाजाता।तस्मात्पदचतुष्टयेनजयदेवस्या
पितदुःखवर्णनाशंकाकुलात।कथनंसमासेकृतं।तदनंतरंसासखीएवंविधांराधांवि
लोक्यसर्वमत्राकंठ्यज्ञात्वानन्यगतिकामसतितांप्रतिश्राशिषःप्रयोगंकृतवतीतत्रा
हा।नल्पमीति॥ ॥भणतिकविजयदेवेविरहविलसितेन।मनसिरभसविभवेहरिरु
दयतुसुकृतेन।तवविरहेण।।हेसखि।एवंविधेदुःखेहरिविरहविलसितेनसुकृतेन
कृत्वामनसिरभसविभवेसतिहरिरुदयतु।एवंविधसकलदुःखहर्त्ताहरिस्तस्याःयोगेचिर
हविलासः।अत्रनिर्वचनीयनानाभावविशेषानुभवैकवेद्यसर्वत्रतदात्मकभावना।अभि
लाषास्मृतिचिंतागुणकीर्त्तनादिरूपाताभिःकृत्वानिरंतरंतस्मिन्स्नेहातिशयरसवि
शेषंस्वरूपंचतुःकृतंगुणपातिशायंतेनसकलदुःखहर्त्ताहरिराविर्भूतोभवतु।अनेनसुकृता।
दिकंतुविनैवसाध्यवित्तव्ययंकृत्वासाध्यते।अत्रतदभावात्।गुणपंकथंसाध्यतइत्याशये

नाद्।मनसिरभसविभवेनेति॥मनसिरभसः स्नेहातिशयरूपो यो विभवो विस्तारस्तस्मिन्स
ति॥एवंविधेनमनसिरभसविभवेनकृत्वायश्चहरिविरहविलसितरूपंयत्सुकृतंतेनकृत्वाहरिरु
दयतु॥पक्ष॥अथवाविरहेणापिदुःखितोहरिस्तवमनसिरभसविभवेनसुकृतेनविरहविल
सितेनसुकृतेनकृत्वाहरिरुदयतु॥विरहदुःखान्मुक्तः सन्नानंदितोभवतु।यथाकंचित्पु
रुषंदुःखितंरोगिणमसाध्यंदृष्ट्वातस्यस्नेहिनोजनास्तद्विलोकनार्थमागतास्तमुपायासा
ध्यंविलोकतस्यपितामाताभार्यापुत्रादिषुवदेयुर्भवत्कृतसुकृतेनायमुत्थितोभवतु।
तथेयमपिसखिराधांप्रतिवदतीतिभावः॥तदेवंविधंसखीसंवादंस्वगीतप्रबंधंकवि
जयदेवेभणतिसति॥तच्च एवंतांतथाविधेनसुकृतेनकृत्वामनसिस्नेहातिशयेहरिरु
दयतु।इत्यर्थः॥एवंपूर्वोक्तप्रकारेणैकासखीस्वहस्तेनजलमादायतस्याश्चक्षुषीप्रो
क्षयित्वातन्मस्तकंस्वांकमारोप्यांगुलीनिक्षिप्यचिबुकंगृहीत्वातन्नाम्नावारंवारंप्रबोधति

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

सतिततःकिंचित्प्रबुद्धासतीदीर्घनिश्वासमुक्त्वार्द्धोन्मीलितनयनाभ्यांमीक्षमाणाजाता।त
देवंविधांतामालोक्यतन्मनसिस्वास्तिजनकंवाक्यंनत्वास्पर्थंसखिप्रियाचरितंचश्रावयन्ना
ह॥ ॥पूर्वंयत्रेति॥ ॥पूर्वंयत्रसमंमयारतिपतेरासादिताःसिद्धयस्तस्मिन्नेवनिकुंजमन्म
थमहातीर्थेपुनर्माधवः॥ध्यायंस्त्वामनिशंजपन्नपितवैवालापमंत्रावलींभूयस्त्वत्कुच
कुंभनिर्भरपरिरंभामृतंवांछति॥२०॥ ॥हेसखिएवंविधोहरिर्माधवःस्वार्थकामुकःपरपी
डानभिज्ञस्तत्प्राप्तिकामनयापूर्वंयत्रयस्मिन्निकुंजेत्वयासहरतिपतेःसिद्धयःआसा
दितास्तस्मिन्नेवनिकुंजमन्मथमहातीर्थेपुनस्त्वत्कुचकुंभनिर्भरपरिरंभामृतंवांछति
किंकुर्वन्।अनिशंत्वांध्यायन्।तवैवालापमंत्रावलींजपन्।एतादृशीदुःखमनुभूयमाना
पिमाधवःकामनापतिश्चेन्नकदाचिदप्येतादृशंदुःखनानुभूतमेवंविधःपूर्वंयस्मिन्कुंजे
स्थितस्तत्सिद्धिरहितंज्ञात्वायतस्त्वंनमिलितातत्स्कायत्रपूर्वंत्वयासहरतिपतेःसप॰

Geeta Govinda
Bhava Prabodhini

त्नीककामदेवतायाः सिद्धयः आश्लेषादयः आसमंतात्प्राप्ताः यादृक्फलवांछा तादृग्देव
तास्यात्तदातादृक्फलंलभेत् इति हेतोः पत्नीप्राप्तिसिध्यर्थं देवतापि सपत्नीकोक्तेति भावः।
काम्यसाधकत्वात्कामदेवताऽतो न्यदेवतानावश्योक्ताः। यद्वा रतिरमणं तत्पतिस्तमेवत्तद
धीनत्वात्तस्यासिद्धयो यत्रासादितास्तस्मिन्नेवनिकुंजमन्मथमहातीर्थे तत्सिध्यर्थं तत्क्षिप्रा
प्त्यर्थं कामधूरके तीर्थे रतिपतिपदोन्यासस्त्रीकदेवताप्युक्ता। स्वयंतद्धितत्वान्मन्मथक
र्तृमहातीर्थे सर्वाराध्यसर्वतीर्थमयमाधवेनाश्रितत्वान्महातीर्थत्वं। ननुसोन्यासक्तः स
न्नतत्सिद्धिप्राप्त्यर्थंमाराधनार्थंगतान्नविप्रतीत्याशयेनाह। ।।त्वदिति।। ।।भयस्तत्रकु
चकुंभनिर्भरपरिरंभामृतंवांछति। कुचकुंभेनोत्कृचाययथामहार्णवेपतितस्यनिमज्जतःकुंभा
वलंबनेननमज्जतितथात्वद्विरहार्णवेपतितस्यतथाविधस्यत्वत्कुचकुंभेननिर्भरंयथा।
स्यात्तथानितरंभारावलंबितःसन्परिरंभामृतंमरणनिवर्तकंत्वद्विरहेतापोपस्थितदशामी

गीत०भाव०
११७

अवस्थानिवारकं यदमृतं तत् वांछति। नन्वेवंविधे तीर्थे ध्यानजपादिना विना केवलतीर्थस्थितो·
वांछापूर्त्तिर्न स्यादिति चेत्तत्राह॥ ॥ध्यायंस्त्वामिति॥ ॥किं कुर्वन्। तस्य विरहे ये धर्मास्त्वय्येव संति
त एव धर्मास्त्वद्विरहे तस्मिन् दृष्टाः। यथा त्वं तं ध्यायसि तथा माधवः। त्वामनिशं निरंतरं ध्यायति
तस्मिन्महातीर्थे त्वामेवेष्टदेवतां संसिद्धिरूपां ध्यायन्निमीलितनयनः। सन्नुन्मत्तो मौनी नख·
शिखाद्यवयवानां चिंतयन्। किंच। तव एव नामावलीकल्परूपाया मैत्रावली मंत्ररूपावलीश्चावि
च्छिन्ननवरत्नावलीं जपन् स नम्रमूर्धः अनन्याविषयः सर्वे प्राप्स्यं त्वत्कुचकुंभनिर्झरमतिशयं य·
थास्यात्तथा परिरंभन एवामृतं वांछतीत्याशयः॥ एवंविधस्यामृतस्य ध्याने वांछया मृतत्वान्म
रणनिवर्त्तनसामर्थ्यं साक्षात् किं न भवेदिति भावः॥ तत एवं श्रुत्वा प्रियतमवार्त्ताश्रवणोत्सुकीं
त्वत्स्थां च ज्ञात्वा अनेन यमकच्छंदेन त्वामनयेपा इत्थिय उक्ते तदुक्तं श्रावयन् तत्रागमनं प्रार्थयंती ११७
त्यत्राह॥ ॥रतिसुखेति॥ ॥रतिसुखसारे गतमभिसारे मदनमनोहरवेषं न कुरु नितंबिनि ग

मनविलंबनमनुसरतंहृदयेशं॥२॥धीरसमीरेयमुनातीरेवसतिवनेवनमाली॥गोपी
पीनपयोधरमर्दनचलितचपलकरयुगशाली॥ ॥धीरसमीरे॥ ॥हेनितंबिनी॥एवंविधोव
नमाली॥वनेवसति।कीदृशेवने।कीदृशेयमुनातीरे।धीरसमीरे।तस्मात्अमनविलंबनंनकुरु।
तंहृदयेशमनुसरेइत्यर्थः॥एवंचिरविरहेणलंघ्य॥सिपरंत्वनितंबगौरवात्तुमदशक्तापि
तंहृदयेशं।तर्कयोवनमाली।कंवस्थितांवनमालांहृदयस्थांकरम्पांगृहीत्वाहंत्वदीयोस्मीत्यु
क्तवान्॥स्थितंत्वंहृदयेशमनुसरेतिनावभावयदा।यः॥एवंतवविरहेसीदतिवनमालीत्वदर्पित॰
वनमालातवकरकल्पितावलंबमेतावत्कालपर्यंतंजीवनस्थितसवनमालीवनेवत्सतीद्दया
वनेवसति।तंहृदयेशमनुसर।योहृदयेशोनवेत्सबाह्याभ्यंतरेहृदयेसर्वदातिष्ठति॥परंत्वेत
ःसंयोगवास्यतच्छ।योयत्रत्यइशोभवतिसतत्रशयनमपिकुरुते।हृदयेशःसर्वदेवत्वयेवपा॰
र्थितं।चिरमुरसिममेवशायानमितिमनुसर।ननुअहंकथंतमनुसरामि।सः॥एवंमामनुसरेन्नदः

न्वहमनुसरामीतिचेत्तत्राह॥ ॥गतमभिसारइति॥ ॥कीदृशंअभिसारेगतं॥पूर्वंतेनाभिस
रणंकृतमस्तिइतस्ततः॥तामनुस्मृत्यराधिकामिति।कीदृशेअभिसारे।रतिसुखसारेयस्मा
त्तस्मिन्रतिसुखार्थमेवाभिसरणंक्रियतेतिच।एवंसाधनरूपस्याभिसरणस्यफलंत्व
मेवनोक्तायमेवेत्यत्राह॥पुनःकीदृशंतं।मदनमनोहरवेषं।त्रैकः।मदनःसुंदरोन्योना
स्तियस्तस्यमनोहर्ता।तस्मादेतादृशफलस्यायेनोक्तेतिभावः।नन्वितिचेत्तदाफलंतत्रन
गच्छति।नोक्ताफलंनोगार्थंसतत्रगच्छेदिति।किंच।यथापूर्वमुक्तंपूर्वंयत्रसममितिश्लोको
क्त्यातस्मिन्नेवनिकुंजमन्मथमहातीर्थेतिवचास्यपंथिध्यायंस्त्वामनिशमित्यादिना।एवंभू
तःसन्माधवस्त्वाराधनंकरोतिसादेवतातत्रगत्वातद्वांछितंफलंप्रयच्छति।तथात्वम
पितथाकुर्विति।किंच।तस्यइष्टदेवताराधिकाहृदयंशोनमवेदयेत्तुहृदयंतुहृदयेरोमद
नमनोहरस्य।अतोहेनितंबिनिनितंबभारात्त्वरयागमनमशक्यापितत्रगत्वानितंबाघव

यवप्राप्तिफलभोगाभिकांक्षिणां त्वमनुसरगमने विलंबनं न कुरु। विलंबे जाते सति। सर्वो
८ क्रुदैहति। शिशिरमयूखे मरणमनुकरोतीत्यस्माद्दशम्यवस्थापर्यंतप्राप्तदशायां विलंबे
तन्माभूदिति तस्मात्तन्न कुर्वीतिभावः। तच्चैवंविधफलभोक्तासन्नवत्वत्प्रेरणेनान्यानि ब
हूनि फलानि भुक्तानि संति। त्वत्सोऽस्त्वधुना यदा भोगाकांक्षा न विष्पतित तदा गंतव्यमित्याकांक्षा
यामाह॥ ॥नामसमेतमिति॥ ॥नामसमेतं कृतसंकेतं वादयते मृदु वेणुं॥ बहु मनुते ननु ते तनु
संगतपवनचलितमपि रेणुं॥ धीरस०॥ तवनामसमेतं कृतसंकेतं मृदु वेणुं वादयते। हे रा
धे इति तव नाम युक्तं कृतसंकेतं यथा स्यात्तथा कृतः संकेतो यस्मिन् कुंजे तिष्ठामि त्वमत्रा
गच्छ। एवंविधः कृतसंकेतः वेणुद्वारया ज्ञापितस्तं मृदु यथान्यो न शृणुयात्तथा वेणुं वद्य
इत्यवयोता वेणुं यस्मात्तं चामृतं बीजं ब्रह्मानंदसुखं यत्स्पर्शवशाद्वेणुध्वनिर्भवति। य
तोऽत एव तां फलमिदं न परमिति। व्रजे रासे तयोरनुवेणुधरं वक्त्रं येर्निपीतं तत्वेंजिया।

Geeta Govinda vallabhacharya-agrahara.org Bala Prabodhini

वृतां फलं।नपरंपरोत्कृष्टोमोक्षः फलंनतेनतच्छ्रवणाद्रसानंदसुखंतुच्छीकृतं।इतिविषया।
नंदसुखं।निशम्यगीतंतदनंगवर्द्धनमित्यनेनभगवत्संबंधीकामः।कामोभिलाषस्तर्ष
श्चेत्यमरः।तेनभगवत्प्राप्तिरूपोयोनंगः।कामोभिलाषस्तद्वर्द्धनं।अतएवसंत्यज्यसर्ववि
षयांस्तवपादमूलंप्राप्ताइतिप्रोक्तत्वात्विषयानंदसुखमपि तुच्छीकृत्यमितिभावः।ए
वंविधंमृडुंवेणुवादयतेस्मएवेतिच।ननुममत्तापनायप्रतारणायेवंवादयतीत्यत्राह:
बहुमनुतइति॥नन्वितिनिश्चयेननप्रतारणाययतःतेतनुसंगतपवन्चलितमपिरेणु
बहुमनुते।धन्योरेणुःमत्प्रियास्पृष्टपवनेन्चलितःसमायाति।तस्याःशरीरस्पृष्टवायु:
नाचलिता।ममनत्वंपस्यास्पर्शोभवति।मममद्भाग्यमितिमत्वास्वशरीरेधारयतीतिनेयं
प्रतारणेतिभावः।पुनःकिंकरोति॥पततिपतत्रेविचलितपत्रेशंकितभवदुपयानं।रचय
तिशयनंसचकितनयनंपश्यतितवपंथानं॥धीर॥३॥पततिपतत्रेविचलितपत्रेशंकि

तन्नवद्उपयानं।गरुत्पक्षच्छदं पत्रं पतत्रं च तनूरुहमित्यमरः।पत्रं पलाशं छदंदलं पर्णं
छदः।।पुमानित्विवात्तेन पतत्रं पक्षिणः पक्षं तस्मिन् विचलति सति पत्रे पतति सति वृक्षस्थि
तस्य पक्षिणः पतत्रे पक्षे विशेषेण चलति तदा तद्वृक्षात् पक्के पत्रे पतति सति तच्छब्दश्रवणे
न भवद्उपयानं भवत्या उपयानं भवतीति भवत्यास्तस्याः भवतः उपयानं वा वर्त्मोनार्थत्वात्तत्प्र
त्ययं तं भवत् उपयानं उपसमीपे यानं प्राप्तं तच्छंकां करोति।किमस्त्रि यायातीति ज्ञात्वा
किशलयपुष्पादिभिः शयनं रचयति तद्रचयित्वा नागतं ज्ञात्वा सचकितनयनं।चकि
तनयनेन सह वर्त्तमानं।सचकितनयनं यथास्यात्तथा तव पंथानं पश्यति।तवागम
नमार्गं कदायास्यति कथं नागतेति मार्गावलोकनं करोतीत्यर्थः।ननु पतति पतत्रे इति
न मम उपयानं।शंकते किंचरणधृतनूपुरशब्दे मागमनं ज्ञानं भवेत् इत्यादि आकांक्षा
यामाह॥ ॥मुखरमधीरमिति॥मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसलोलं।चल

Geeta Govinda
Bal Prabodhini

सखिकुंजंसतिमिरपुंजंशीलयनीलनिचोलं।धीरस०।सपरमचतुररायशिरोमणिस्त्व
नज्ञातंएत्रावागमनेनान्दपुरध्वनिनारिपूणामागमनज्ञानंभाव्यदितिज्ञात्वास्यस्त्वागमि
ष्यतीतितस्मात्तथाशंकाति।अतस्त्वंमुखरंशब्दायमानंयतोधीरंमार्गेचलनेएकत्रस्थि
तिरहितंतादृशंचकेलिसुलोलं।नवीष्यतीति।कमिवरिपुमिव।अनीष्टविरोधित्वात्।
यथारिपुर्वांछितविरोधीभवतितथेदमपीतितस्मादेतत्त्यजेतिभावः।तर्हिगौरंगमहं
मार्गेकोपिद्रक्ष्यतिकथंगच्छामीत्याशंकायेनाह।चलसखीति॥ ॥हेसखीसमानशीलल्लो
घथानवायमात्रायस्तथाममप्राप्तिः।अतोनीलनिचोलं।शीलय।कुंजंचल।अभिसारो
चितंपरिधानवस्त्रोपर्याच्छादकंनीलनिचोलंधारयशीलय।धारयतर्हितत्रगत्वाकिं
त्तस्माज्जएवाधार्यक्रीडायामंतरायन्नतत्वात्प्रकाशावतिचकुंजेत्याजपमितामोद्दामा
हा।कीदृशंकुंजं।सतिमिरपुंजं।तिमिरपुंजेनसहवर्त्तमानं।सतिमिरपुंजं।एवंविधंकुं र

जंप्रतिचला।गमनंकुरु।तत्रतंत्वंतत्क्षायथेच्छंरमणंकुर्वित्याशयः।अग्रेवर्द्धमाणंपरि
धत्तमपिवसनंक्षीणकांचेपरिगलितंनतिष्ठति।कथमिदंधार्यमितिभावः।।नन्वेवंकष्टेनः
तत्रगमनेकी[illegible]स्यादित्यत्राह।।उरसीति।। ।।उरसिमुरारेरुपहितहारेघनइवतरल
बलाकेतडिदिवपीतेरतिविपरीतेराजसिसुकृतविपाके।।धी०।।५।।हेपीते।एवंत्वं:
गोरांगीद्धिताधुनाविरहेणपीतासि।यतःसापित्वद्विरहेणहंतहरिणीरूपायइति
तथात्वंतत्रगतासतिमुरारेःउरसिरतिविपरीतेराजसिविपरीतरतावित्यर्थः।यद्वा
।रतिरितिरमणीतस्मिन्विपरीतेयथापूर्वोक्तितवोत्कंठितयाकिशलयाशयननिवेशि
तयाचिरमुरसिममैवशयानं।यथातवरतिस्तथाविपरीतामुरारेःस्नेहातिशयेनप्रे
मरसालसलात्तथारतिः।तद्यथा।तल्पेकिंच।मृगलक्ष्याविरचितेतल्पेतिलागैर्निजै
रंतःप्रेमरसाब्जसंप्रियतमामंगेदधानोहरस्तथायमपिस्वनारसहनान्हमांझाला

Gita Govinda
vallabhacharya
Braj Pramodhini

रतिविपरीते उक्तमिति भावः। तर्हि सोपि मदनमनोहरवेषविलुस्कादतिसुकुमारस्य कद
यकथमेवंविधा जवामीत्याशयेनाह॥ ॥मुरारेरिति॥ ॥मुरो महाबलिष्ठदैत्यस्तस्यारि
र्नाशकत्वात् तामनर्थवान् तो धीरोद्धतनायकस्तस्योरसि। यद्वा। यमुनातीरवसति वन
मालीत्युक्तत्वात्तत्र गमने कदाचिदै[illegible]त्यादिकृतोपद्रवप्रतिबंधको न विपत्तीति चेत्तत्रा
पि। मुरारेरिति। मुरः पंचशिरा दैत्यो जलस्थस्तस्यारिर्नाशकत्वात्तत्र छंका न कार्येति वा। ए
वंविधस्य मुरारेः उरसि तथा राजसि। कीदृशे उरसि। उपहितहारो नव विरहे सर्वाण्यपाभ
रणानि त्यक्तानि शीतलत्वात्ता[illegible]कमुक्ताहारः उपहितः धारितो यस्मिंस्तस्मिन्नाकस्मि

न्केवा तरलबलाके घने तमि दिवा तरला चंचला बलाका बकपंक्तिर्यस्मिन्नेवंवि
धे घने विद्युदिव॥ यथा तरलबलाकाद्युक्ते घने तडितहारे मुरारेरुरसि त्वं राजसि ब
लाकास्थानीयमुक्ताहारः। घनस्थानीयमुरारिस्तडित्स्थानीया त्वमिति भावः॥ क

सतिसुकृतविपाकेसति।कोटिजन्मकृतानानानाविधानांमेतत्फलानिकांक्षयाकृ
तानांपुण्यानांयोविपाकःफलंतस्मिन्सतितिभावः।।एवंविधसुकृतविपाकोदयःस्या
त्तदामुरारेरुरसिस्थितस्त्रोनानुसन्धानंवेदितिच।कोटिजन्मपर्यंततसदर्थदानव्रतत
पःस्वाध्यायादिसुकृतेपिमुरारेरुरसिनाविर्भवतितर्हितस्योरसिलग्नंराजसीयमपि
विपरीतारतिरावरणीयस्मिंस्तस्मिन्ना।ननुमांवृथाशयनीलनिचोलंवदसितेनावारि
तातनिदिवकथंत्रोम्मानविप्रतीत्याशयेनाह।।विगलितवसनमिति।। ।।विगलितवस
नेपरिहृतरसनंघटयजघनमपिधानं।किंत्वानयच्छायनेपंकजनयनेनिधिमिवहर्षनि
धानंधीरपाणेएवंस्तुत्वामुकुलितनयनांदृष्ट्वातांप्रतिवदति।हेपंकजनयने।पं
कजवन्नयनंयस्याःसा।यथापंकजंसूर्यंविनामुकुलितंतिष्टति।तंदृष्ट्वाप्रफुल्लितं
भवेत्तथातवताहृष्टोनयनेधुनाहंविनानिमीलितेवर्ततस्तत्रागत्वातांहदृष्टं।विलो

क्पातेनयनेतथानविष्पतीत्याशयेनायथायथापंकजेंतापनाशकंभवति।तथातादृशानय
नावलोकनात्तस्यविरहतापशांतिर्नविष्पतीत्यर्थः।एवंविधातत्रगतासतित्वदागमनंकृ।
त्वाकिंकिशलयैःकोमलपल्लवैरचितेकिशलयशयनेजघनद्वयोपस्थानेकाचितेत्यर्थः।अल
र्पविघ्नेनादिपदंतत्काघटय्यजयनमित्यस्यानासक्तौबिंबवासहमानादयिमकार्या
र्थंघटजघनमितिनावः।कीदृशंजघनंविगलितवसनं।श्रीकृष्णेनहेतुनाविगलितंवस
नंयस्मात्तत्।एवंविधविगलितवसनाम्नावरणंनावास्तमितिदिवराजसीतिसूचितं।तत्कु
तः।पुनःकीदृशंपरिहृतरशनं।त्वयैवदूरीकृतारशनायस्यतत्।वसनावलंबी
कटिस्थमानरशनाकिंकिणीपरशनापदवाच्यंतदवलंबनाभावाद्विगलितंचतत्वसन
मित्यर्थः।अतएवापिधानंनविद्यतेपिधानमावरणंयस्मिंस्तत्।अथैवंविधापिपि
नत्वाच्छिथलीकृतजघनदुकूलमिति।कीदृशंतत्वात्तस्यैवश्रीकृष्णस्यहर्ष

निधानंतत्क्षणेविगलितसनंदर्शनित्वात्श्रीकृष्णस्यानंदनिधानं।निदानंवात्रानंदोत्पत्ति
करणं।एवंविधनिरावरणदर्शनस्य शोभमानंदोनुवेदित्यर्थः।कमिव।निधिमिव।नितर
मतिशयेन।निरंतरंध्यायेतचिंत्यतेतन्निधिस्तमिवागतावरणस्यनिधेर्दर्शनेहर्षोजाय
तएवायथानिधावहोरात्रिप्राप्त्यर्थंबुद्धिस्तस्मिन्नेवतिष्ठतितत्प्राप्त्यर्थंबुद्धिस्तस्मिन्ने
वतिष्ठति।तत्प्राप्त्यनंतरंसुवर्णरूपानिधिर्वस्त्रादिनिबध्दातद्दूरीकृत्यावलोकनान्महान्ह
र्षनिर्वेत्तथाविगलितवसनंजघनंनिधिःसुवर्णवर्णतुल्यंतस्यदर्शनस्पर्शनाभ्यांभगव
तस्तथानिविष्पतीतिभावः।तेनसह एवंविधासतितस्योरसिनाकेदिवत्वंराजसीत्यर्थः।रा
जयिष्यसिइत्यस्मिन्नर्थेवर्तमानसामीप्यलात्।।लट्।नन्वेवंकालवशनिधिस्कलदर्शनप्रा
प्तेगमिष्यामीकांक्षायामाह।। ।।हरिरभिमानीति।। ।।हरिरभिमानीरजनिरिदानीमि
यमपियातिविरामं।।कुरुममवचनंसत्वररचनंपूरयमधुरिपुकामं।धी

रंण॥३॥सर्वेषांसकलदुःखहर्त्ताहरिःसत्वांनिधिरिवमन्यतेतदातत्रगमनेविलंबेजाते
तस्याभिमानोनवेदहंनिधिरिवमन्येसामांनगणयति।एवंज्ञात्वातस्याप्यभिमानोभविष्य
ति।यतोमधुरिपुस्तस्यस्नेहेतातस्मात्तस्यकाममभिलखितं।एरयायका।अभितःसर्वतःसर्व
त्रत्वांमन्यते।तद्यथा।प्रासादेसादिशिदिशिचसापृष्ठतःसापुरःसापर्यंकेसापथिचसा
तद्वियोगातुरस्य।हंहोचेतःप्रकृतिरपरानास्तिचैकापिसासासासासाजगतिसकलेको
यमद्वैतवादः॥इत्येवंविधोभिमानीतस्माद्विलंबोनकार्यः॥यद्वा॥हरिरितिमानीवेवा
नन्वहंतत्रगतासतिमधुरिपुलाम्ममसन्मानंनकरिष्यतीत्यत्राह॥अतिमानीति॥अश
येनत्वांमानयितुंशीलंयस्यसः॥यतोबहुमनुतेतेनतुसंगतपवनचलितमपिरे
णुमितितदासात्वंतत्रगताचेत्तवसन्मानंकथंनकरिष्यतीतिभावः॥तदासर्वारात्रिर्व्यती
तेसमयांतरेगमिष्यामीत्याशयेनाह॥ ॥रजनीरिदानीमिति॥ ॥यदापूर्वरात्रिर्गतातदे

दानीमपियंवर्त्तमानारजनिर्विरामंयाति।रजःनीयतेप्राप्यतेययासारजनी।रजोनिबिडां-
धकारस्तद्युक्तेयमपीदानींरजनिर्विरामंयाति।विमवंरामंरमणंतद्विधाचंद्रोदयात्प्रकाशाक-
त्वाद्विगतरमणयोग्यानविद्यतीत्यर्थः॥यद्वा।विरामोवसानंनिवर्त्तनंयाति।प्राप्नोतिच।तस्मा-
न्ममवचनंसत्वररचनंकुरु।शीघ्रगमनार्थंयारचनामुखरमधीरंमंजीरस्यत्यागः।नीलनीचो-
लादीशीलनरूपायारचनातद्यथास्यात्तथामधुरिपुंकामंशरया।वांछितंतत्सर्वंकुर्वितिभा-
वः॥यदिनानुसरणंकरोषितदायंमधुरिपुः।मधुनःरिपुः।यत्रमधुपश्रपति।तत्ररिपुत्वा-
त्तंगृहीत्वास्ववशेकरिष्यति।तस्मात्तंतस्यकामानिलिखितंपूरयतथान्यत्रमधुग्रहणार्थंनग-
च्छेदितिभावः॥ननुमधुरिपुश्चेत्तदानिर्दयंप्रतिकथंयामीत्याशयेनाह॥ ॥श्रीजयदेवे-
कृतहरिसेवेभणतिपरमरमणीयं।प्रमुदितहृदयंहरिमतिसदयंनमतसुकृतकमनी-
यं॥धीर०॥८॥परमरमणीयमतिसदयंसुकृतकमनीयंहरिंप्रमुदितहृदयंयथास्यात्त

Geeta Govinda
Bhakti Prabandhini

था॥ नमतावत्सति॥ इदंकृतहरिसेवेजयदेवेनभणतिमति॥ अत्रायमर्थः॥ कामहर[illegible]र्मधुरिपु
रेव॥ अन्यथापरमरमणचोगं अतिदययाहंस्वर्स्मानंहरिंसकलजडःखहस्तैरंतंथमुदितहृ
दयंयथास्यात्तथायूयंनमत॥ भगवन्नमनःसन्मुखीकरणादितिबोधितायांबहुवचनं॥
यद्वा॥ मिलिताःसर्वाःसख्योद्वंतत्रगताःसंत्यःहरिंनमता॥ यद्वा॥ मानापनोदनार्थंहरिराग
तनमतितथाद्वयं॥ प्रसादनार्थंविलंबेजातेसतिमधुरिपुंनमततइतिभावः॥ कीदृशं॥ सुकृत
कमनीयं॥ सुकृतेनपुण्यातिशयेनाकमनीयोकमुअनिकांक्षायां॥ यदामहत्पुण्यातिशा
येनवति॥ तदाहरेर्नमनेच्छानवतीतिमत्तथा॥ यद्वा॥ सुष्टुकृतेनसुकृतेनशोभनचरित्रेणस
र्वेषांवांछनीयां॥ यद्वा॥ नमनरूपेणसुकृतेनकमनीयंमनोहरमितिभावः॥ एतस्मिन्नर्थेज्ञा
मानेसतिनमामीतिचेत्तत्राह॥ कसति॥ श्रीजयदेवेनभणतिसति॥ जयदेवनत्यमाणंकृत
॥ कीदृशेनकृतहरिसेवे॥ कृताहरेःसेवायेन॥ तस्मिन्हरिसेवांविनाएतादृशचरित्राणां॥ १२४

Geeta Govinda
Vallabhacharya Bhav Prabodhini

वर्णनसामर्थ्यंनस्यात्तस्मादेवंविधस्यजयदेवस्यप्रामाण्यंपतस्मिन्भणतिसति।भणितपदोक्त्या
सर्वसिद्धमेवभणितं।यथावेदपुस्तकस्थेनभण्यतेतथेदंचेदवद्भणितंतान्नत्वाधुनिकमित्यर्थः।
यथा॥नत्वहंतेनाकारिताविनात्वत्कथंयामीत्यत्राह।श्रीजयदेवेभणतिसति।श्रीश्चजय
श्चताभ्यांयुक्तोदेवःक्रीडापरःसर्वोत्कृष्टोयोमधुरिपुस्तस्मिन्भणतिसति।अहमिहनिवसा
मियाहिराधामनुनयमद्वचनेनचानयेथाइतितस्मिन्भणतिसति।नन्विदंवाचनिकंनत्वं
त्वरितंकायिककृत्यात्सिद्धिर्विकंविनाकथंयामीत्याशयेनाह।कीदृशेतस्मिन्राकृतहरिसे
वेकृताहरिणासेवायेनासौतस्मिन्राध्यायंस्त्वामनीशंजपन्नपितवैवालापमंत्रावलीमि
त्यादिरूपाभिर्वाकरणादात्मसिद्धिर्विकमानसवाचिककायिककृतियुक्तेतस्मिन्भणति
सति।प्रमुदितहृदयंयथास्यात्तथाह्ययंतेंनमसेत्तिभावाःसूचिता।उज्ज्वलस्यानुरागंद्यो
तयन्नतिशीघ्रमभिसारयितुंप्रियदुःखमपिवर्णयन्निवसखीविकरतीति॥ ॥विकिरति

Geeta Govinda
Bala Prabodhini

मुकुंदः श्वासान्नासापुटे मुकुंदरीत्याते प्रविशति मुकुंदः कुंजं पुंजन्मुकुंदबकुलताम्पति रचयति शय्या
पर्यंकत्वं मुकुंदरीत्याते मदनकदनक्रांतः कांते प्रियस्तव वर्त्तते॥ ॥हे कांते त्वं कांतासि वद्धनना
सि सोपि तव प्रियः मदनकदनक्रांतो वर्त्तते। मदत्रापकस्य कदनेन मारणेन क्रांतः। अनाया
सम्भ्रमोद्वेगे प्रलब्धः श्वास एव वचा। इंद्रियार्थे विमूढात्मा क्रांत इत्यभिधीयते। एवंविधस्तव
गमनं विलंबं ज्ञात्वा मुकुंदवारं मुखनासिकाभ्यां सकाशात्सीत्काररूपान् श्वासानुच्चैर्विशे
षेण किरति मुंचति। नागतैव मत्प्रिया। अद्यनागमिष्यतीति ज्ञात्वा अत्रान्तरे मुकुंदरीत्य
न्नायस्यां त्वं तिष्ठसि तां दिशं [illegible] मुकुंदरीत्यते। वारं वारं दिशं पश्यति। कदाचिदन्ये
न पंथागत्य कुंजांतरे स्थिता भविष्यतीति ज्ञात्वा मुकुंदः कुंजं प्रविशति। तत्र विलोक्य त्वा
मपश्यन् पुनर्बहिरागत्य कथं नागतेति पुंजन्श्वार्द्धं कुर्वन् मुकुंदस्तामपति [illegible] निद्रां प्राप्नो
ति। मां हठादनुरागेनैव सा मां प्रत्तमेवागमिष्यतीति निश्चित्य मुकुंदः शय्यां रचयति। कदाचि